# मूलरामायणम्



धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ।। 1.1.12 ।।

पदच्छेदः – धर्मज्ञः सत्यसन्धः च प्रजानां च हिते रतः यशस्वी ज्ञानसम्पन्नः शुचिः वश्यः समाधिमान्

पदपरिचयः –
धर्मज्ञः = धर्मस्य ज्ञाता
सत्यसन्धः = सत्यनिष्ठः
प्रजानां च = जनानां च
हिते रतः = कल्याणे तत्परः
यशस्वी = कीर्तिमान्
ज्ञानसम्पन्नः = ज्ञानवान्

पदपरिचयः –
शुचिः = पवित्रम् आचरणं यस्य
वश्यः = जितेन्द्रियः
समाधिमान् = समाधिनिष्ठः

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ।। 1.1.12 ।।

धर्मं जानाति इति धर्मज्ञः

सत्या सन्धा (प्रतिज्ञा) यस्य सः सत्यसन्धः

यशः अस्य अस्ति इति यशस्वी

ज्ञानेन सम्पन्नः ज्ञानसम्पन्नः (तृ.तत्)

समाधिः अस्य अस्ति इति समाधिमान्

धरति लोकान् पुण्यात्मभिः इति धर्मः (“धृ")

सन्धा प्रतिज्ञा मर्यादा – अमरः

वश +यत् = वश्यः

रम् +क्त = रत

शुच् (पूतिभावे) शुच्यते अनेन इति शुचिः

अन्वयः
धर्मज्ञः सत्यसन्धः प्रजानां च हिते रतः यशस्वी ज्ञानसम्पन्नः शुचिः वश्यः समाधिमान् च (सः अस्ति)

# कृदन्ताः

"कृत्" इति प्रत्ययाः

कृत् अन्ते यस्य सः कृदन्तः ।

"धातुं नाम करोति इति कृत् ।"

१४०-अधिकाः

कुत्र ? धातुभ्यः परतः

किम् सिद्ध्यति ? प्रातिपदिकम्

ततः सुप्-प्रत्ययस्य योजनेन सुबन्ताः भवन्ति ।

किमर्थम्? विशेष-अर्थ-बोधनार्थम् ।

कर्तृ-अर्थे (नेता)

कर्म-अर्थे (पठितम्)

विधि-अर्थे (पठितव्यम्, पठनीयम् )

# विध्यर्थकः – ण्यत्/यत् प्रत्ययः

ण्यत् / यत् = य इति श्रूयते

कर्मणि/भावे – विध्यर्थे अनयोः प्रयोगः ।
तव्यत् / अनीयर्- इव
कर्तव्य/करणीय – कार्य
पठितव्य/पठनीय - पठ्य
त्रिषु लिङ्गेषु रूपम्
कार्यः कार्या कार्यम्
पठ्यः पठ्या पठ्यम्

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते।।5.3।।

ण्- एव भेदः
ण्यत्-वृद्धिः
यत् = गुण

स्वरान्तानां यत्
जी=जेयम्
नी=नेयम्
श्रु = श्रव्यम्
ध्यै = ध्येयम्
गै = गेयम्
दा = देयम्

ऋकारान्तानाम्, हलन्तानाम् ण्यत्
कृ= कार्यम्
हृ= हार्यम्
वच = वाच्यम्
नट् = नाट्यम्

पवर्गान्तानां यत्
लभ्- लभ्यम्
गम् – गम्यम्
शप् - शप्यम्

विशेष-प्रयोगाः अनेके सन्ति ।
पाणिनीय-सूत्राणि एव प्रमाणम् ।

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।। 1.1.13 ।।

पदच्छेदः – प्रजा-पति-समः श्रीमान् धाता रिपु-निषूदनः रक्षिता जीव-लोकस्य धर्मस्य परिरक्षिता

पदपरिचयः –
प्रजापतिसमः = ब्रह्मदेव-तुल्यः
श्रीमान् = शोभासम्पन्नः
धाता = पितृ-तुल्यं प्रजान् धरति
रिपु-निषूदनः = शत्रु-नाशकः
रक्षिता = रक्षकः

पदपरिचयः –
जीवलोकस्य = प्राणिनाम्
धर्मस्य परिरक्षिता = धर्मस्य पूर्ण-रक्षकः

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।। 1.1.13 ।।

पाति इति पतिः

प्रजानां पतिः = प्रजापतिः

प्रजापतिना समः प्रजापतिसमः

श्रीः अस्य अस्ति इति = श्रीमान्

धृ (धारण-पोषणयोः) + तृच् = धाता

नि+षद् (विशरणगत्यवसादनेषु) नितरां सूदयति निषूदनः

रिपूणां निषूदनः = रिपुनिषूदनः

रक्ष् + तृच् = रक्षिता

जीवानां लोकः तस्य = जीवलोकस्य

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।। 1.1.13 ।।

उपमा-अलङ्कारः –

प्रजापतिसमः धाता

प्रजापतिः = उपमानम्

समः = उपमावाचकम्

(रामः = उपमेयम्)

धाता = साधारणधर्मः

प्रजापतिः, विश्वसृट्, अण्डजः, कमलोद्भवः, सत्यकः,आत्मभूः, पितामहः, स्वयंभूः, अब्जयोनिः, कमलासनः, वेधः, विधिः, पूर्वः, सदानन्दः, हंसवाहनः, सुरज्येष्ठः, हिरण्यगर्भः, चतुराननः, द्रुहिणः, स्रष्टा, विधाता, नाभिजन्म, निधनः, रजोमूर्तिः, परमेष्ठी, लोकेशः, धाता, विरिञ्चिः - अमरः

अन्वयः
प्रजापतिसमः धाता श्रीमान् रिपुनिषूदनः जीवलोकस्य रक्षिता धर्मस्य परिरक्षिता (सः अस्ति)

# कृदन्ताः

## तृच्-प्रत्ययः

तृच् = तृ

कुत्र भवति ? धातुभ्यः परतः भवति ।
कस्मिन् अर्थे भवति ? कर्त्रर्थे ।
ण्वुल्, तृच् - समानार्थकौ ।
तृजन्ताः सर्वेऽपि पुंसि नपुंसि च ऋकारान्ताः ।
स्त्रीलिङ्गे ईकारान्ताः भवन्ति ।

कर्ता
श्रोता
पठिता
गन्ता
नन्ता

# कृदन्ताः

# तृच्-प्रत्ययः

## धातवः त्रिविधाः

इट् सहिताः धातवः सेट्-धातवः ।
पठितः,पठितुम्, लिखितःलेखितुम्,
हस्, खाद्, चल्, धाव्..

इट् रहिताः धातवः अनिट्-धातवः ।
(न इट्=अनिट्)
श्रोतुं, श्रुतः, दातुं, दत्तः, भुज्, क्री,
नी, ची...

इडागमनस्य विकल्पः येषां धातूनां भवति ते वेट्-धातवः
(वा इट् = वेट्)
मोहितुं, मोग्धुम्

# तृच्-प्रत्ययः

नर्तिता
पठिता
भविता
वन्दिता
कथयिता

छेत्ता
वक्ता
दाता
श्रोता
जेता

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।। 1.1.14 ।।

पदच्छेदः – रक्षिता स्वस्य धर्मस्य स्व-जनस्य च रक्षिता वेदवेदाङ्ग-तत्त्वज्ञः धनुर्वेदे च निष्ठितः क्षिता

पदपरिचयः –
स्वस्य धर्मस्य रक्षिता = आत्मनः (स्वाध्याय-यज्ञकार्य-दण्ड-युद्धादीनां) धर्मस्य रक्षकः
स्वजनस्य रक्षिता च = स्वकीय-बन्धुजनस्य च रक्षकः
वेदवेदाङ्गतत्त्वज्ञः = चतुर्वेदानां वेदाङ्गानां (शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषाणाम्) मर्मज्ञः
धनुर्वेदे च निष्ठितः = युद्ध-शास्त्रे पारङ्गतः

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।। 1.1.14 ।।

स्वस्य जनः तस्य = स्वजनस्य

वेदाः च वेदाङ्गानि च = वेदवेदाङ्गानि (द्वन्द्वः)

वेदवेदाङ्गानां तत्त्वं = वेदवेदाङ्गतत्त्वम् (ष.त.)

वेदवेदाङ्गतत्त्वं जानाति इति वेदवेदाङ्गतत्त्वज्ञः (उ.प.त.)

धनुषः वेदः तस्मिन् = धनुर्वेदः (ष.त)

तस्य भावः = तत्त्वम् (तद् + त्व - तद्धितान्त-प्रत्ययः)

तत्त्वं जानाति इति तत्त्वज्ञः (उ.प.त.)

नि+स्था+क्त=निष्ठित

अन्वयः

स्वस्य धर्मस्य रक्षिता स्वजनस्य च रक्षिता वेदवेदाङ्गतत्त्वज्ञः धनुर्वेदे च निष्ठितः (सः अस्ति)

# अष्टादश-विद्यास्थानानि

- वेदाः  - ४
- वेदाङ्गानि  - ६
- उपवेदाः – ४
- उपाङ्गानि - ४

ऋग्वेदः, यजुर्वेदः, सामवदेवः ,अथर्वणवेदः

शिक्षा, व्याकरणम्, छन्दः, निरुक्तम्, कल्पः ज्योतिषम्

आयुर्वेदः -चरकसंहिता, सुश्रुतसंहिता

धनुर्वेदः -विश्वामित्र-प्रणीतः,

गान्धर्ववेदः- भरतस्य नाट्यशास्त्रम्,

अर्थशास्त्रम्

अष्टादश पुराणानि

न्याय-वैशेषिक-साङ्ख्य-योग-दर्शनानि

मीमांसा (पूर्व-उत्तरमीमांसे)

धर्मशास्त्राणि – मनुस्मृतिः, आगमाः, इतिहासौ

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। 1.1.15 ।।

पदच्छेदः – सर्व-शास्त्रार्थ-तत्त्वज्ञः स्मृतिमान् प्रतिभानवान् सर्व-लोक-प्रियः साधुः अदीनात्मा विचक्षणः

पदपरिचयः –
सर्व-शास्त्रार्थ-तत्त्वज्ञः = सकल-शास्त्राणां मर्मज्ञः
स्मृतिमान् = यस्य स्मरण-शक्तिः अतुल्या
प्रतिभानवान् = मतिमान्
सर्व-लोक-प्रियः = सर्वे-जन-प्रियः
साधुः = सज्जनः/मधुर-स्वभावी
अदीनात्मा = उदार-स्वभावी
विचक्षणः = पण्डितः

# सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
# सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। 1.1.15 ।।

सर्वाणि च तानि शास्त्राणि = सर्वशास्त्राणि (क.तत्)

अर्थश्च तत्त्वञ्च = अर्थतत्त्वे (द्वन्द्व)

सर्वशास्त्राणाम् अर्थतत्त्वे = सर्वशास्त्रार्थतत्त्वे(ष.तत्)

सर्वशास्त्रार्थतत्त्वे जानाति इति = सर्वशास्त्रार्थतत्त्वज्ञः(उपपद.स)

स्मृतिः अस्य अस्ति इति = स्मृतिमान्

प्रति + भान (भा-प्रकाशे) +ल्युट् = प्रतिभानम्

प्रतिभानम् अस्य अस्ति इति प्रतिभानवान्

सर्वे च ते लोकाः = सर्वलोकाः (क.तत्)

सर्वलोकानां प्रियः = सर्वलोकप्रियः (ष.तत्)

साध्-संसिद्धो + उण् = साधुः, साधयति धर्मकार्याणि इति साधुः

महाकुल,कुलीन,आर्य,सभ्य,सज्जन,साधु –अमरः

न दीनः = अदीनः (नञ्-तत्)

अदीनः आत्मा यस्य सः = अदीनात्मा (बहुव्री)

विशेषेण चष्टे (भाषते) इति विचक्षणः (चक्षिङ्-व्याक्तायां वाचि)

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। 1.1.15 ।।

अपि शास्त्रेषु कुशला लोकाचार-विवर्जिताः ।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ॥ - पञ्चतन्त्रः

**अन्वयः**

सर्वशास्त्रार्थ-तत्त्वज्ञः स्मृतिमान् प्रतिभानवान् सर्वलोकप्रियः साधुः अदीनात्मा विचक्षणः (सः अस्ति)